श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - १६

# भारतीयदर्शनसिद्धान्तप्रभा

प्रधानसम्पादकः
**प्रो. गोपबन्धुमिश्रः**
कुलपतिः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादिका
**डॉ. बी. उमामहेश्वरी**
सहायिकाचार्या
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्,

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्**

श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - १६

# भारतीयदर्शनसिद्धान्तप्रभा

प्रधानसम्पादकः

**प्रो. गोपबन्धुमिश्रः**

कुलपतिः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादिका

**डॉ. बी. उमामहेश्वरी**

सहायिकाचार्या

श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्,

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्**

**प्रकाशकः -**

**डॉ. दशरथजादवः**
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातराज्यम्
दूरभाषः - ०२८७६ - २४५३२, फेक्सः २४४१७
E-mail: sssu.veraval@gmail.com
Web: www.sssu.ac.in

**सहायकसम्पादकः समन्वयकश्च**

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

***© Shree Somnath Sanskrit University, 2020***

| | | |
|---|---|---|
| **संस्करणम्** | - | प्रथमम् |
| **वर्षम्** | - | मार्च -२०२० |
| **प्रतिकृतयः** | - | ३५० |
| **ISBN** | - | 978-93-83097-35-7 |
| **मूल्यम्** | - | ₹५१०/- |
| **मुद्रकः** | - | जलाराम ग्राफिक्स एन्ड ऑफसेट<br>परमहंस एपार्टमेन्ट के पास, होटेल कावेरी के पीछे,<br>एस. टी. रोड, वेरावल-३६२ २६६,<br>जि. गीर-सोमनाथ, गुजरात (भारत)<br>दूरभाष - ०२८७६-२२१८६१ |

Shree Somnath Sanskrit University Grantha Series - 16

# BHĀRATĪYADARŚANASIDDHĀNTAPRABHĀ

*Chief Editor*
**Prof. Gopabandhu Mishra**
Vice-Chancellor
Shree Somnath Sanskrit University
Veraval

*Editor*
**Dr. B. Uma Maheswari**
Assistant Professor
Shree Somnath Sanskrit University
Veraval

**Shree Somnath Sanskrit University - Veraval - Gujarat**

**Published by:**

**Dr. Dashrath Jadav**
Registrar
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval - 362 266.
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-244532, Fax: 02876-244417
E-mail: sssu.veraval@gmail.com
www.sssu.ac.in

**Assistant Editor & Co-ordinator:**
Dr. Kartik Pandya
Research Officer
Shree Somnath Sanskrit University, Veraval.

***© Shree Somnath Sanskrit University, 2020***

All rights reserved. No part of this publication may be reproduced, stored in a retrieval system or transmitted in any form or by any means, electronic or mechanical, including photocopying, recording or otherwise, without the written permission from the publisher.

**Edition** : First

**Year** : March - 2020

**Copies** : 350

**Price** : ₹510/-

**ISBN** : 978-93-83097-35-7

**Printed by** : Jalaram Graphics & Offset
Nr. Paramhans Appartment, B/h. Hotel Kaveri
S. T. Road, Veraval - 362 266
Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-221861

# व्यवहारे सर्वे चार्वाकाः

**प्रो. अर्चना दुबे,**
अनुस्नातकविभागाध्यक्षा,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्।

---

चार्वाकदर्शनस्य हि लोकायतमित्यन्वर्थं नाम। लोकेषु आयतं विस्तीर्णमनायाससाध्यमिति लोकायतम्। चारुः आपातमनोरमः लोकचित्ताकर्षको वाकः वाक्यमस्य इति चार्वाकः[१]। इदानीं लोके अस्यैव दर्शनस्य सिद्धान्तानाम् अनुकरणं मनुजैः विधीयते। कथमेतस्य दर्शनस्य व्यावहारिकत्वमस्ति इति प्रतिपाद्यते।

चार्वाकप्रतिष्ठापकेन नास्तिकशिरोमणिना बृहस्पतिना यावन्तः सिद्धान्ताः प्रतिपादिताः ते सर्वेऽपि यथा लोके समुपलभन्ते न तथा अन्येन केनचिद्दर्शनकृता प्रतिपादिताः सिद्धान्ताः व्यवहारे दृष्टिपथमुपयान्ति। यथा अस्य मतमस्ति यत् परमेश्वरो निःश्रेयसं न प्रयच्छति, मृत्युश्च अगोचरो नास्ति। अस्य मतं चैतद् दुरुच्छेदम् अस्ति यतो हि सर्वेऽपि प्राणिनः अस्य मतमनुवर्त्तन्तोऽनुभूयन्ते। तदुक्तं सर्वदर्शनसङ्ग्रहे -

“प्रायेण सर्वप्राणिनस्तावत् **यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः/ऋणं कृत्वा घृतं पिबेत्। भस्मीभूतस्य देहस्य पुनरागमनं कुतः”॥** इति लोकगाथामनुरुन्धाना नीतिकामशास्त्रानुसारेणार्थकामावेव पुरुषार्थौ मन्यमानाः पारलौकिकमर्थमपह्नुवानाः चार्वाकमतमनुवर्तमाना एवानुभूयन्ते”।[२]

अस्य तात्पर्यमस्ति यत् व्यवहारे सर्वेऽपि यावज्जीवं सुखं जीवेद् इति न्यायमेवानुसरन्तो दृश्यन्ते। भवतु नाम सः जनो यस्य कस्यचन धर्मस्य

---

[१] शब्दकल्पद्रुमः – चार्वाकः

[२] सर्वदर्शनसङ्ग्रहः चार्वाकमतम्

स्यात्। न केवलं हिन्दवः एव अपितु अन्य धर्मावलम्बिनोऽपि जनाः एतमेव मतमनुतिष्ठन्ति। इदानीं लोकस्य यत्किमपि जीवनाय अपेक्षितं तत्सर्वमपि ऋणं कृत्वैव जनाः स्वीकुर्वन्ते। प्रायस्तादृशं गृहं व्यवहारे न दृश्यते यः कस्यचिदृणी न स्यात्। इदमेव चार्वाकस्य अपि चेष्टितं यदृणं कृत्वा घृतं पिबेदिति।

अथ चेमे चार्वाकाः अर्थकामावेव पुरुषार्थं मन्वाना भवन्ति। न किमपि पारलौकिकमस्तीति तस्मादेव न पारलौकिकं मोक्षम् इमे स्वीकुर्वन्ति। तथैव लोकोऽपि अनुतिष्ठति पारलौकिकेषु विषयेषु इदानीन्तना जनाः न विश्वसन्ति। तस्मादेव न दुष्कुर्वन्तो बिभ्यति लोकाः। पृथिव्यादीनि चत्वार्येव भूतानि नाकाशस्य भूतत्वमस्ति इति च चार्वाकाः व्यावहारिकं ब्रुवन्ते। एतेभ्यः चतुर्भ्यः एव भूतेभ्यः शरीरोत्पत्तिः तेष्वेव शरीरनाशोऽपि जायते न प्रेत्यसंज्ञा अस्ति। यथोक्तम् -

**अत्र चत्वारि भूतानि भूमिवार्यनिलोऽनलः।**
**चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते॥**
**किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्।**[३]

चैतन्यविशिष्टं शरीरमेव च आत्मा अस्ति। न देहातिरिक्त आत्मा प्रमाणाभावात्। देहातिरिक्तो हि न आत्मा क्वचिदप्युलभते अप्रत्यक्षत्वात्। स्थूलोऽहं कृष इत्याद्यनुभवात् शरीरस्यैव स्थूलत्वकृषत्वादिदर्शनात् शरीरमेव आत्मा इति एतेषां मतम्। अत्र पुनः आक्षिप्यते यत् ममायं देहः इत्याद्युक्तौ षष्ठ्यर्थः सम्बन्धः तदनुसारं मत्सम्बन्धी देह इत्यर्थो भवति न तु अहम् एव देहः इति। तत्समाधीयते – ममायं देह इत्याद्युक्तिःराहोःशिरइत्यादिवत् औपचारिकी अस्ति तत्र वास्तविकता नास्ति। यथोक्तम् -

---

[३] सर्वदर्शनसङ्ग्रहः चार्वाकमतम् श्लोकः– ३-४

**अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः।**
**देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः।**
**ममदेहोऽयमित्युक्तिः संभवेदौपचारिकी॥**[४]

एतादृशं सर्वं लोकव्यवहारे दृश्यते। देहातिरिक्तमात्मानं जनाः न स्वीकुर्वन्ति। तादृशस्य आत्मभूतस्य देहस्य नाश एव मुक्तिः, ज्ञानादीनां मोक्षकारणत्वं नास्ति। यतो हि देहनाशात्परं न किञ्चिदपि मुक्त्यादिकं प्रत्यक्षम् अनुभूयते। यथोक्तम् –

**देहस्य नाशो मुक्तिस्तु न ज्ञानान्मुक्तिरिष्यते॥**[५]

प्रत्यक्षमेव मात्रम् एकं प्रमाणं चार्वाकमते प्रत्यक्षातिरिक्तस्य अनुमानादेः प्रामाण्यं नास्ति। तस्मादेव इमे पारलौकिकं प्रत्यक्षप्रमाणबहिर्भूतं स्वर्गनरकादिकं न किञ्चिदपि स्वीकुर्वन्ति। अङ्गनाद्यालिङ्गनादिजन्यंसुखमेव एतेषां मतेपुरुषार्थः। कण्टकादिजन्यं दुःखमेव नरकम् इति । यथोक्तम् –

**अङ्गनालिङ्गनाज्जन्यं सुखमेव पुमर्थता।**
**कण्टकादिव्यथाजन्यं दुःखं निरय उच्यते॥**[६]

सुखं न पुरुषार्थः सर्वदा दुःखसम्मिश्रि तत्वात् इति नैव चिन्त्यम् यतो हि अनिवार्यरूपेण लब्धस्य दुःखस्य अपायं कृत्वैव सुखं भोक्तव्यम्। तदुदाहरति यथामत्स्यार्थीसशल्कान् सकण्टकान्मत्स्यान् आनयति तत्र चसयावत् स्वीकार्यं तावत् एव स्वीकृत्यनिवर्त्तते। यथावाधान्यार्थीसपलालानिधान्यानि आहरति तत्रापिसयावत् स्वीकार्यं तावत् स्वीकृत्य निवर्त्तते। तस्माद्दुःखभयात् अनुकूलवेदनीयं सुखं त्यक्तुमुचितं नास्ति। मृगाः सन्ति इति तद्भयात्शालयः नोप्यन्ते, भिक्षुकाः आगमिष्यन्ति इति तद्भयात् भोजनम् एव न पच्यते इति

---

४ सर्वदर्शनसङ्ग्रहः चार्वाकमतम् श्लोकः - ४-५

५ सर्वदर्शनसङ्ग्रहः चार्वाकमतम् श्लोकः - २

६ सर्वदर्शनसङ्ग्रहः चार्वाकमतम् श्लोकः - १

तु नास्ति। यदि कश्चित् भीरुः दृष्टं सुखं त्यजेत्तर्हि स तु पशुवन्मुर्खो भवेत्। तदुक्तम् –

**त्याज्यं सुखं विषयसंगमजन्म पुंसां,**
**दुःखोपसृष्टमिति मूर्खविचारणैषा।**
**व्रीहीञ्जिहासति सितोत्तमतण्डुलाढ्यान्,**
**को नाम भोस्तुषकणोपहितान्हितार्थी ॥**[७]

इमे च चार्वाकाः वैदिकं कर्म निन्दन्ति यतो हि परलोकादिकं किमपि न भवति। परलोकाद्यभावे पारलौकिकं सुखं सुतरामेव न भवति। तस्यपारलौकिकसुखस्य भावेबहुवित्तव्ययेन शरीरायासेन च साध्येऽग्निहो-त्रादौविद्यावृद्धाः कथं प्रवर्त्तन्ते इति प्रश्नोऽपि न प्रमाणम्। यतो हि अनृतव्याघातपुनरुक्तादिदोषैर्दूषिताः वेदा अपि न प्रमाणम्। ये चवैदिकम्मन्याः वर्त्तन्ते ते धूर्तबकाःपरस्परम् एव कर्मकाण्डस्य प्रामाण्यवादिनो ज्ञानकाण्डं ज्ञानकाण्डस्य प्रामाण्यवादिनश्च कर्मकाण्डंप्रतिक्षिपन्ते।तस्मादेवत्रयी न प्रमाणम् अपितु धूर्तप्रलापमात्रमेव। तस्मात् अग्निहोत्रादिकस्य जीविकामात्रं प्रयोजनम्। एतदेव साम्प्रतं व्यवहारेऽधिकं दृश्यते। यज्ञादिषु जनाः न तथा श्रद्दधति। एतदेव उच्यते चार्वाकमतप्रसिद्धेन आभाणकेन

**अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।**
**बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ॥**[८]

अतः तादृशाग्निहोत्रादिना साध्यम् अदृष्टादिकमपि नास्ति। एतत्सर्वंबृहस्पतिनाप्युक्तम्–

---

७ सर्वदर्शनसङ्ग्रहः चार्वकमतम् – पृष्ठसंख्या - ६

८ सर्वदर्शनसङ्ग्रहः चार्वकमतम् – पृष्ठसंख्या - ६

**न स्वर्गोनापवर्गो वा नैवाऽऽत्मा पारलौकिकः।**
**नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः॥**[९]

एतस्य तात्पर्यं भवति यत् स्वर्गापवर्गपुण्यपापादिकं किमपि न भवति, आत्मा च पारलौकिको नास्ति, वर्णाश्रमादीनां या यज्ञादिकाः क्रिया भवन्ति ताः अपि फलदायिकाः न भवन्ति। यदि एतत्सर्वमदृष्टं न भवति तर्हि जगद्वैचित्र्यं कथमुपपद्यते विचित्रस्य अस्य जगतः चित्रकर्त्ता तु कश्चिदवश्यं भवेत्। एवं नास्त्येव कश्चिदपि जगत्कर्त्ता नास्ति। स्वभावादेव जगद्वैचित्र्यम् इदम् अस्ति। अग्नेः स्वभाव एव उष्णत्वं न केनचित् सः उष्णीकृतः तथैव जलस्य शीतत्वम् अपि न सकर्तृकम् एतत्सर्वं वैचित्र्यं स्वभावजन्यं एवतदुक्तम्-

**अग्निरुष्णो जलं शीतं समस्पर्शस्तथानिलः।**
**केनेदं चित्रितं तस्मात्स्वभावात्तद्व्यवस्थितिः।**[१०]

पुनश्चयदि एतत् मन्यते यत् यज्ञादिना स्वर्गादीष्टसाधनं भवति तर्हि तत् मिथ्याव्यवसाय एव। यतो हि अमीषां कर्मकाण्डिनाम् अनुसारं यदि ज्योतिष्टोमे यज्ञे निहतः पशुः स्वर्गं गच्छति तर्हि तेन यज्ञे स्वपिता एव किमर्थं न हन्यते तस्यापि स्वर्गप्राप्तिः भवेत्। यथोक्तम् -

**पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति।**
**स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते॥**[११]

पुनश्च मृतानां जनानां देहनाश एव मुक्तिः इत्युक्तम्। पुनः श्राद्धादिना तेषां तृप्तिर्भवति इत्यपि धूर्तैः दुष्प्रचारितमेव। यथा निर्वाणस्य प्रदीपस्य पुनः तैलद्वारा ज्योतिर्न लभते तथैव मृतानां जनानां श्राद्धेन तृप्तिर्न भवति। यद्येवम्

---

[९] सर्वदर्शनसङ्ग्रहः चार्वाकमतम् , पृष्ठसंख्या – २०

[१०] सर्वदर्शनसङ्ग्रहः चार्वाकमतम् , पृष्ठसंख्या – १९

[११] सर्वदर्शनसङ्ग्रहः चार्वाकमतम् , पृष्ठसंख्या – २०

अस्ति तर्हि गृहात् बहिर्गच्छतां जनानां पाथेयकल्पनं व्यर्थमेव । गृह एव स्थित्वा श्राद्धं कृत्वा देशान्तरं गतानाम् अपि तेषां तृप्तिः भवेत्। यथोक्तम्

**गच्छतामिह जन्तूनां व्यर्थं पाथेयकल्पनम्।**
**गेहस्थकृतश्राद्धेन पथि तृप्तिरवारिता॥**[१२]

स्वर्गस्थाः पितरोपि भूमौ दानादिना तृप्ता न भवन्ति। यदि स्वर्गस्थिताः जनाः अत्रैव दानतः तृप्ताः भवेयुस्तर्हि प्रासादस्य उपरिस्थाः जनाः अपि भूमावेव दानेन तृप्येरन्। एतत्सर्वमपि चार्वाकस्य मतं न कश्चिदपि बुद्धिमांस्तार्किकः लोके अपह्नुते। एतदर्थमेव लोके यावज्जीवं सुखं जीवेदिति न्यायम् अनुसरन्तो जना भूयांसोनु अभूयन्ते।

मृते देहाद्विनिर्गतः परं लोकं गच्छति इत्यपि मिथ्यैव। यदि सः परं लोकं गच्छेत् तर्हि स्वबन्धून् विकलान् वीक्ष्य बन्धुस्नेहात् पुनः कथं भूमौ नायाति। तस्मादेव जीविकोपायतया ब्राह्मणैः मृतानां प्रेत्यकार्याणि कर्त्तव्यानीति वेदशास्त्रादिषु लिखितं येन ब्राह्मणानां जीवनं ससुखं भवेत् एतच्च अन्यत्र क्वचिदपि नास्ति । तदुक्तम् -

**यदि गच्छेत्परं लोकं देहादेष विनिर्गतः।**
**कस्माद्भूयो न चायाति बन्धुस्नेहसमाकुलः॥**
**ततश्च जीवनोपायो ब्राह्मणैर्विहितस्त्विह।**
**मृतानां प्रेतकार्याणि न त्वन्यद्विद्यते क्वचित्॥**[१३]

तस्मादेव वेदस्य न कश्चित् कर्त्ता इत्यपि न चिन्त्यम् । यतो हि वेदस्य त्रयः कर्त्तारः सन्ति धूर्ताः पण्डिताः, भाण्डाः, निशाचराश्च। एभिरेव वेदे सर्वं

---

[१२] सर्वदर्शनसङ्ग्रहः चार्वाकमतम् , पृष्ठसंख्या – २१

[१३] सर्वदर्शनसङ्ग्रहः चार्वाकमतम् , पृष्ठसंख्या – २१

निगदितं यथा जर्भरी तुर्फरी इत्यादिकं धूर्त्तैः पण्डितैरुक्तम् , भाण्डाः निशाचराश्च मांसखादनं यज्ञादिषु कर्त्तव्यम् इत्यवोचन् । तदुक्तम् -

**त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचराः ।**
**जर्फरीतुर्फरीत्यादि पण्डितानां वचः स्मृतम् ॥**
**मांसानां खादनं तद्वन्निशाचरसमीरितम् ॥**

तस्मादेव भूयसांप्राणिनाम् अनुग्रहार्थंचार्वाकमतम् आश्रयणीयम् इति दिक् ।

इत्थं सर्वं लोके दृश्यमानं चार्वाकदर्शनस्य कर्त्रा बृहस्पतिना प्रतिपादितेषु सिद्धान्तेषु एव दृश्यते। इति कैश्चित् चार्वाकसिद्धान्तनिदर्शनैः अस्य दर्शनस्य व्यावहारिकत्वं मयात्र महान् प्रयत्नेन प्रत्यपादि। दोषान् अविगणयद्भिः भवद्भिरहं क्षम्या । धन्यवादः ।

✦✦✦